VIDYA - A JOURNAL OF GUJARAT UNIVERSITY

*Peer-Reviewed, Multidisciplinary & Multilingual Journal*

**ISSN:** 2321-1520 **E-ISSN:** 2583-3537

# ॥ मन्त्रोपबृँहकं श्रीमद्भागवतम् ॥

**मिहिरकुमार गिरिशभाई पण्ड्या**

शोधच्छात्रः, संस्कृतविभागः, भाषासाहित्यभवनम्, गुजरात युनिवर्सिटी
मो. 8320590337 ; ई.मेल – mhrpandya.mp@gmail.com

**बिन्दवः –**

- ❊ श्रीमद्भागवतमहापुराणे उपबृंहणम् ।
- ❊ तत्र वेदमन्त्राणाम् उपबृंहणम् ।
- ❊ तत्र च उपनिषन्मन्त्राणामपि उपबृंहणम् ।

**आधारभूतशब्दाः –** उपबृंहणम् - स्वीकरणम् , श्रीमद्भागवतमहापुराणम् , वेदमन्त्राः , उपनिषन्मन्त्राः ।

**सारांशः**

श्रुतञ्च सर्वैः निगमकल्पतरोर्गलितं फलं श्रीमद्भागवतमहापुराणम् ।[1] यदत्र वेदविदांवरीष्ठेन श्रीमता वेदव्यासेन अष्टादशपुराणेषु लोकोपभोगाय वेदतत्वज्ञानाय च वेदतत्वस्वारस्यं सुग्रथितम् ।
चितेऽस्मिन् विषये शास्त्रद्वयस्य अर्थात् वेदविषये श्रीमद्भागवतवेषये च जानन्त्येव भवन्तः। अपि च श्रीमद्भागवतमहापुराणे वेदमन्त्राणामुपनिषद्मन्त्राणां चोपबृंहणं वर्तते तदपि श्रुतिपथमेव।
तत्र श्रीमद्भागवतमहापुराणस्याध्ययनप्रसंगे दृष्टिपथमागतानां पद्यानां स्मृतिपथमागतैः मन्त्रैः सह साम्यं दृष्टमासीत् । तदत्र शोधपत्रत्वेन दृग्गोचरीकर्तुं प्रयतामि ॥

## विषयोपस्थापनम् -

धवं मे माधवं वन्दे मेधावन्तं परं गुरुम् ।
धियं मे माधवीं कर्तुमारभे मधुरां गिरम् ॥

प्राप्ते सुचारुतरावसरे श्रीमद्भागवतमहापुराणस्याध्ययनसमये तत्र तत्र वेदमन्त्राणामुपनिषद्मन्त्राणां चोपबृंहणमदृश्यत। अतः तमेव विषयमाधारीकृत्य किञ्चित् प्रस्तौतुकामोऽस्मि। विषयस्यास्य चयने इमाः पद्यपङ्क्तय अपि कारणीभूताः।

पुराणपूर्णचन्द्रेण श्रुतिज्योत्स्नाः प्रकाशिताः।[2]
इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।[3]
निगमकल्पतरोर्गलितं फलम् .......... ।[4]
सर्ववेदान्तसारं हि श्रीभागवतमिष्यते ।[5]
भारतव्यपदेशेन ह्याम्नायार्थश्च दर्शितः ।[6]
सर्ववेदेतिहासानां सारं सारं समुद्धृतम् ।[7]

आभिः प्रामाणिकपद्यपंक्तिभिः ज्ञायते यत् वेदविदांवरीष्ठेन श्रीमता वेदव्यासेन अष्टादशपुराणेषु लोकोपभोगाय वेदतत्वज्ञानाय च वेदतत्वस्वारस्यं सुग्रथितम् । चितेऽस्मिन् विषये शास्त्रद्वयस्य अर्थात् वेदविषये श्रीमद्भागवतवेषये च जानन्त्येव भवन्तः। अपि च श्रीमद्भागवतमहापुराणे वेदमन्त्राणामुपनिषद्मन्त्राणां चोपबृंहणं वर्तते तदपि श्रुतिपथमेव।
तत्र श्रीमद्भागवतमहापुराणस्याध्ययनप्रसंगे दृष्टिपथमागतानां पद्यानां स्मृतिपथमागतैः मन्त्रैः सह साम्यं दृष्टमासीत् । प्राप्ते चावसरे शोधपत्रत्वेन विषयस्यास्य प्रतिपादने मोमुद्यते मे मनः ॥

चितः विषयोऽस्ति "मन्त्रोपबृंहकं श्रीमद्भागवतम्" । विषयस्यार्थोऽस्ति यत् ऋग्यजुस्सामथर्वणवेदे निगदितानां मन्त्राणां[8] श्रीमद्भागवतमहापुराणस्थैः श्लोकैः साकं शब्दार्थगतसाम्यत्वरुपेण द्विधा उपबृंहणं दृश्यते। तदाधारीकृत्य मन्त्रश्लोकयोः समन्वयः प्रदर्शितः ।

वेदचतुष्टयेऽपि समुपलभ्यमाणमत्यन्तं सुप्रसिद्धं पुरुषसूक्तं वर्तते। तदन्तर्गतमन्त्राः प्रकारान्तरेण शब्दार्थगतसाम्येन वा श्रीमद्भागवतमहापुराणे वरिवर्तीषु स्तुतिषु दृश्यन्ते । तद्यथा ------

वेदे - सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। [9]

भागवते - यमाहुराद्यं पुरुषं सहस्राङ्घ्र्यूरुबाहुकम् ।[10]

---

[1] श्रीमद्भागवतमहापुराणम् १/१/३ ।
[2] महाभारत, आदिपर्व १/८६ ।
[3] महाभारत, आदिपर्व १/२६७ ।
[4] श्रीमद्भागवतमहापुराणम् १/१/३ ।
[5] श्रीमद्भागवतमहापुराणम् १२/१३/१५ ।
[6] श्रीमद्भागवतमहापुराणम् १/४/२९ ।
[7] श्रीमद्भागवतमहापुराणम् १/३/४२ ।
[8] उक्तं च कात्यायनश्रौतसूत्रे "ऋचो यजुंषि सामानि निगदा मन्त्राः॥ १/३/१ । "
[9] शुक्लयजुर्वेदः ३१/१ ।
[10] श्रीमद्भागवतमहापुराणम् ३/७/२२ ।

http://vidyajournal.org

ISSN: 2321-1520 E-ISSN: 2583-3537

वेदे - स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशांगुलम्॥[11]
भागवते - तेनेदं आवृतं विश्वं वितस्तिं अधितिष्ठति ।[12]
वेदे - पुरुष एवेदम् यत् भूतम् यच्च भव्यम्।[13]
भागवते - सर्वं पुरुष एवेदं भूतं भव्यं भवच्च यत् ।[14]
वेदे - एतावानस्य महिमातो ज्यायांश्च पूरुषः।[15]
भागवते - महिमैष ततो ब्रह्मन् पुरुषस्य दुरत्ययः ।[16]
वेदे - पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि॥[17]
भागवते - पादेषु सर्वभूतानि पुंसः स्थितिपदो विदुः ।
अमृतं क्षेममभयं त्रिमूर्ध्नोऽधायि मूर्धसु ॥[18]
वेदे - ततो विष्वङ् व्यक्रामच्छाशनान शने अभि॥[19]
भागवते - सृती विचक्रमे विश्वङ् साशनानशने उभे ।[20]
वेदे - ब्राह्मणोऽस्य मुखामासीद्........।[21]
भागवते - ब्रह्माननम् ....।[22]
भागवते - विप्रो मुखं ब्रह्म ...।[23]
भागवते - मुखतोऽवर्तत ब्रह्म पुरुषस्य कुरूद्वह ।
यस्तून्मुखत्वाद् वर्णानां मुख्योऽभूद् ब्राह्मणो गुरुः ॥[24]
वेदे - बाहू राजन्य: कृत:। ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत॥[25]
भागवते –
बाहुभ्योऽवर्तत क्षत्रं क्षत्रियस्तदनुव्रतः । यो जातस्त्रायते वर्णान्पौरुषः कण्टकक्षतात्॥३१॥
विशोऽवर्तन्त तस्योर्वोः लोकवृत्तिकरीर्विभोः। वैश्यस्तदुद्भवो वार्तां नृणां यः समवर्तयत् ॥ ३२ ॥
पद्भ्यां भगवतो जज्ञे शुश्रूषा धर्मसिद्धये । तस्यां जातः पुरा शूद्रो यद्वृत्त्या तुष्यते हरिः ॥ ३३ ॥[26]
भागवते - क्षत्रभुजो महात्मा विड्रूरुरङ्घ्रिश्रितकृष्णवर्णः ।[27]
वेदे - चंद्रमा मनसो जातश्चक्षोः सूर्यो अजायत। मुखादिंद्रश्चाग्निश्च प्राणाद्वायुरजायत ॥[28]
भागवते - सोमं मनो यस्य समामनन्ति ।[29]
भागवते - अग्निर्मुखं यस्य तु जातवेदा ।[30]

**ऋग्वेदस्थमन्त्राः -----**

वेदे विष्णोर्नुकं वीर्याणि प्रवोचं य: पार्थिवानि विममे रजागुंसि यो अस्कभायदुत्तर गुं सधस्थं विचक्रमाणस्त्रेधोरुगायो विष्णोरराटमसि विष्णो: पृष्ठमसि विष्णो: श्नप्त्रेस्थो विष्णोस्स्यूरसि विष्णोर्ध्रुवमसि वैष्णवमसि विष्णवे त्वा॥[31]

भागवते- विष्णोर्नु वीर्यगणनां कतमोऽर्हतीह। यः पार्थिवान्यपि कविर्विममे रजांसि। चस्कम्भ यः स्वरहसास्खलता त्रिपृष्ठं । यस्मात् त्रिसाम्यसदनाद् उरुकम्पयानम् ॥[32]

---

11 शुक्लयजुर्वेदः ३१/१ ।
12 श्रीमद्भागवतमहापुराणम् २/६/१५ ।
13 शुक्लयजुर्वेदः ३१/२ ।
14 श्रीमद्भागवतमहापुराणम् २/६/१५ ।
15 शुक्लयजुर्वेदः ३१/३ ।
16 श्रीमद्भागवतमहापुराणम् २/६/१७ ।
17 शुक्लयजुर्वेदः ३१/३ ।
18 श्रीमद्भागवतमहापुराणम् २/६/१८-१९ ।
19 शुक्लयजुर्वेदः ३१/४ ।
20 श्रीमद्भागवतमहापुराणम् २/६/२० ।
21 शुक्लयजुर्वेदः ३१/११ ।
22 श्रीमद्भागवतमहापुराणम् २/१/३७ ।
23 श्रीमद्भागवतमहापुराणम् ८/५/४१ ।
24 श्रीमद्भागवतमहापुराणम् ३/६/३० ।
25 शुक्लयजुर्वेदः ३१/११ ।
26 श्रीमद्भागवतमहापुराणम् ३/६/३१-३३ ।
27 श्रीमद्भागवतमहापुराणम् २/१/३७ ।
28 शुक्लयजुर्वेदः ३१/१२ ।
29 श्रीमद्भागवतमहापुराणम् ८/५/३४ ।
30 श्रीमद्भागवतमहापुराणम् ८/५/३५ ।
31 ऋग्वेदः १/१५४/१ ।
32 श्रीमद्भागवतमहापुराणम् २/७/४० ।

http://vidyajournal.org

वेदे - **द्वा सुपर्णा** सयुजा सखाया समानं वृक्षं परिषस्वजाते | तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभि चाकशीति।[33]

भागवते - सुपर्णावेतौ सदृशौ सखायौ यदृच्छयैतौ कृतनीडौ च वृक्षे ।

एकस्तयोः खादति पिप्पलान्नमन्यो निरन्नोऽपि बलेन भूयान् ।[34]

वेदे - **हये जाये मनसा तिष्ठ घोरे** वचांसि मिश्रा कृणवावहै नु | न नो मन्त्रा अनुदितास एते मयस्करन् परतरे च नाहन्।[35]

भागवते - अहो जाये तिष्ठ तिष्ठ घोरे न त्यक्तुमर्हसि ।

मां त्वमद्याप्यनिर्वृत्य वचांसि कृणवावहै ॥[36]

वेदे - को आद्धा वेद क इह प्र वोचत्कुत आजाता कुत इयं विसृष्टिः। अर्वाग्देवा अस्य विसर्जनेनाथा को वेद यत आबभूव ।[37]

भागवते - को वेत्ति भूमन् भगवन् परात्मन्योगेश्वरोतीर्भवत-स्त्रिलोक्याम् ।

क्व वा कथं वा कति वा कदेति विस्तारयन् क्रीडसि योगमायाम् ॥[38]

## उपनिषत्स्थमन्त्राः ------

उपनिषदि - ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् । तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ।[39]

भागवते - आत्मावास्यमिदं विश्वं यत्किञ्चिज्जगत्यां जगत्

तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनम्[40]

उपनिषदि - भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ।[41]

भागवते - भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः ।

क्षीयन्ते चास्य कर्माणि मयि दृष्टेऽखिलात्मनि॥[42]

भागवते - भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः ।

क्षीयन्ते चास्य कर्माणि दृष्ट एवात्मनीश्वरे ॥[43]

उपनिषदि - यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान्। न बिभेति कुतश्चनेति ।[44]

भागवते - यतोऽप्राप्य न्यवर्तन्त वाचश्च मनसा सह ।

अहं चान्य इमे देवाः तस्मै भगवते नमः ॥[45]

उपनिषदि - अणोरणीयान् महतो महीयान् आत्मा गुहायां निहितोऽस्य जन्तोः । तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमात्मनः ।[46]

भागवते - अणोरणिम्नेऽपरिगण्यधाम्ने महानुभावाय नमो नमस्ते ॥[47]

उपनिषदि - आत्मा वा इदमेक एवाग्र आसीत् । नान्यत् किञ्चन मिषत् । स ईक्षत लोकान्नु सृजा इति ।[48]

भागवते - भगवानेक आसीदमग्र आत्माऽऽत्मनां विभुः ।

आत्मेच्छानुगतावात्मा नानामत्युपलक्षणः ॥[49]

उपनिषदि - आत्मानं रथिनं विद्धि शरीरं रथमेव च बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च | इन्द्रियाणि हयाना हुर्विषयांस्तेषु गोचरान् आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ।[50]

भागवते - आहुः शरीरं रथमिन्द्रियाणि हयानभीषून्मन इन्द्रियेशम्

वर्त्मानि मात्रा धिषणां च सूतं सत्त्वं बृहद्बन्धुरमीशसृष्टम् ।[51]

उपनिषदि - **प्रणवो धनुः** शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते । अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत् ॥[52]

---

33 ऋग्वेदः १/१६४/२० , अथर्ववेद ९/९/२० , मुण्डकोपनिषद् ३/१/१ , श्वेताश्वेतरोपनिषद् ४/६ ।

34 श्रीमद्भागवतमहापुराणम् ११/११/६ ।

35 ऋग्वेदः १०/९५/१ ।

36 श्रीमद्भागवतमहापुराणम् ९/१४/३४ ।

37 ऋग्वेदः १०/१२९/६ ।

38 श्रीमद्भागवतमहापुराणम् १०/१४/२१ ।

39 ईशावास्योपनिषद् १ ।

40 श्रीमद्भागवतमहापुराणम् ८/१/१० ।

41 मुण्डकोपनिषद् २/२/८ ।

42 श्रीमद्भागवतमहापुराणम् ११/२०/३० ।

43 श्रीमद्भागवतमहापुराणम् १/२/२१ ।

44 तैत्तरीयोपनिषद् २/९/१ ।

45 श्रीमद्भागवतमहापुराणम् ३/६/४० ।

46 कठोपनिषद् १/२/२०, श्वेताश्वतर उपनिषद् ३/२० ।

47 श्रीमद्भागवतमहापुराणम् ८/६/८ ।

48 ऐतरेयोपनिषत् १/१/१ ।

49 श्रीमद्भागवतमहापुराणम् ३/५/२३ ।

50 कठोपनिषद् १/३/३४ ।

51 श्रीमद्भागवतमहापुराणम् ७/१५/४१ ।

52 मुण्डकोपनिषद २/२/४ ।

http://vidyajournal.org

**ISSN:** 2321-1520 **E-ISSN:** 2583-3537

भागवते - धनुर्हि तस्य प्रणवं पठन्ति शरं तु जीवं परमेव लक्ष्यम् ।[53]

एवं रुपेण पश्यामश्चेदितोप्यधिकाधिकानां मन्त्राणां श्रीमद्भागवते उपबृंहणं दृश्यते । अन्यच्चेतोप्यधिकं वैशिष्ट्यं श्रीमद्भागवतमहापुराणस्थस्य दशमस्कन्धस्य सप्ताशीतितमेऽध्याये वर्तते । स च भागः **"वेदस्तुतिः "** इति नाम्ना प्रसिद्धः । एवं " जय जय जह्यजामजित दोषगृभीतगुणां.....चरतोऽनुचरेन्निगमः ॥[54]" इति श्लोकादारभ्य "द्युपतय एव ते न ययुरन्तमनन्ततया.. सह यत् श्रुतयः त्वयि हि फलन्त्यतन्निरसनेन भवन्निधनाः ॥[55]" इति श्लोकपर्यन्तं वर्तते । तत्रत्यं संपूर्णं वर्णनं यथा वेदे दृश्यते तद्वदेव अत्रापि दृश्यते । तेन ज्ञायते सिद्ध्यति च यत् वस्तुतः श्रीमद्भागवतमहापुराणं निगमकल्पतरोः गलितं फलमेव । तथा च "मन्त्रोपबृंहकं श्रीमद्भागवतम्" **इति शोधपत्रस्य शीर्षकं युक्तियुक्तमिति दिक् ॥**

॥ ॐ ॥

## ॥ सन्दर्भग्रन्थसूचिः ॥

1. श्रीमद्भागवतमहापुराणम् । (अनेक व्याख्या समलङ्कृतम्, स्कन्धः – १ तः १२), संपादकः – कृष्णशङ्कर शास्त्री, प्रकाशकः, वि.संवत् २०२२.
2. श्रीमद्भागवतमहापुराणम् । (प्राचीना देवनागरी-वाचना), संपादकः – डॉ. केशवराम काशीराम शास्त्री, प्रकाशिका – श्रीमद्वल्लभ – विश्वधर्म संस्था अहमदाबाद, आवृत्तिः – प्रथमा, वि.संवत् – २०५८.
3. શ્રીમદ્ભાગવત-દર્પણ. , લેખક – (મુ.) કૃષ્ણશંકર શાસ્ત્રી, (અનુવાદ) ચતુર્ભુજ તોષનીવાલ, પ્રકાશક – શ્રી ભાગવત વિદ્યાપિઠ
4. શ્રીમદ્ભાગવત-વૈશિષ્ટ્યમ્. , લેખક – હેમાંગભાઇ શાસ્ત્રી, મુદ્રક – ઓફસેટ પ્રિન્ટર્સ,અમદાવાદ
5. शुक्लयजुर्वेदः।(मूलमात्र) अष्टविकृति, याज्ञवल्क्यशिक्षा, प्रतिज्ञासूत्र, सर्वानुक्रमसूत्र, पारस्करगृह्यसूत्र, कात्यायनोक्त त्रिकाण्डस्नान-सूत्र, भोजनादिसूत्र सहित । । चौखम्बा संस्कृत प्रतिष्ठान । वाराणसी ।
6. अथर्ववेदः । मूल मन्त्र ,पदपाठ,सायणभाष्य एवं पं. रामस्वरूप शर्मा गौड़ कृत हिन्दी अनुवाद सहित ] । चौखम्बा संस्कृत प्रतिष्ठान । वाराणसी ।
7. ऋग्वेदः । मूल मात्र । चौखम्बा संस्कृत प्रतिष्ठान । वाराणसी ।
8. ईशावास्योपनिषद् , मुण्डकोपनिषद् , तैत्तरीयोपनिषद् , श्वेताश्वतर उपनिषत् , ऐतरेयोपनिषत् , कठोपनिषद् । ईशाद्यष्टोत्तरशतोपनिषद: ] हिन्दी भाषानुवाद सहित ] व्याख्याकार- आचार्य केशव लाल वी.शास्त्री । चौखम्बा संस्कृत प्रतिष्ठान । वाराणसी ।

http://vidyajournal.org

[53] श्रीमद्भागवतमहापुराणम् ७/१५/४२ ।

[54] श्रीमद्भागवतमहापुराणम् १०/८७/१४ ।

[55] श्रीमद्भागवतमहापुराणम् १०/८७/४१ ।